Shukavirachitam Shivamahimna Stotram

# શુકવિરચિતં શિવમહિમ્નસ્તોત્રમ્

## Document Information

Text title : Shukavirachitam Shivamahimna Stotram

File name : shukavirachitaMshivamahimnastotraM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shivAkhyaH chaturthAMshaH | adhyAyaH 20| 15-53||

Latest update : August 20, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# શુકવિરચિતં શિવમહિમ્નસ્તોત્રમ્

પતઙ્ગદૃગપાઙ્ગતો ભવભુજઙ્ગભઙ્ગો ભવેત્
    સમુલ્લસિતપલ્લવૈર્ભજતિ મુક્તિવલ્લીવ મામ્ ।
કુરઙ્ગકિણસઙ્ગદૃક્પ્રસરતોઽદ્ય સાંસારિકં
    રુજં હર દયાઘનૈર્વિતર દૃષ્ટિવર્ષં મયિ ॥ ૧૫॥

નિશાપતિકલાધરં કુલિશપાણિસમ્પૂજિતં
    સુશોભિજટજહ્નુજામૃડશિખણ્ડચૂડાધુના ।
દૃઢં તવ પદામ્બુજં શિવ ભજામિ હૃત્પદ્મકે
    શિવાસખ સુખં સદા શિખિસખાકૃતે પાહિ મામ્ ॥ ૧૬॥

શાન્તં દાન્તહૃદન્તરે સુવિહિતં યાન્તં વૃષેન્દ્રેણ તં
    સ્વાન્તસ્થં સકલેષુ ભાન્તમખિલં તાન્તં સદા પોષકમ્ ।
વાન્તપ્રાયભવેષુ તુચ્છિતધિયં તં મુક્તિકાન્તાપ્રિયં
    દેવં દાન્તશમપ્રશાન્તમનસા યામીષણાવર્જિતઃ ॥ ૧૭॥

અમ્બરકેશસુશમ્બરવૈરિન્ ત્રિપુરહરામ્બરહૃદિ વિહર ।
મુરહર શઙ્કર દ્વિરજવરાનન શરવણભવનુત પરિપાહિ ॥ ૧૮॥

એકૈવાસ્મિ ન સંશયસ્ત્રિભુવને નેહાસ્તિ નાના જગત્
    મિથ્યૈવાહિભયં યથા મરુમરીચ્યાર્દ્રીકૃતા ભૂર્ભવેત્ ।
શુક્તૌ યત્કલધૌતવન્મૃદિ મહાકુમ્ભોપમાનં તથા
    વાચારમ્ભણમેવ યુક્તિજનકં કાર્યં ન વૈ કારણમ્ ॥ ૧૯॥

યદ્ભાસા જગદદ્ય ભાતિ નિતરાં સૂર્યાનલૌ વાયવો
    ભીત્યા ભાન્તિ સ્વતેજસામપિ પરં જાનન્તિ નો માં સ્થિતમ્ ।
કો મોહો મયિ પશ્યતાં સ્થિરચરં ત્વેકત્વનાનાત્વધી -
    ર્ભિદ્યત્યેવ વિભેદભાવજનકં ત્વજ્ઞાનમેતત્સ્ફુટમ્ ॥ ૨૦॥

ઈશાવાસ્યમિદં જગચ્છ્રુતિશતૈઃ પ્રોક્તં ચ તદ્ભેદધીઃ

નો કશ્ચિદ્વિનિવર્તતે ચ યતતે મોક્ષાશ્રમે શ્રાન્તિયુક્ ।
ત્વદ્ભક્ત્યા વિમુખઃ સદૈવ હિ વૃથા બોધાદ્ભવે ભ્રશ્યતે
બુદ્ધ્યા વૃદ્ધધિયો ભવન્તિ ચ વૃથા કિઞ્ચાયુષોઽન્તે નરાઃ ॥ ૨૧॥

વિદ્યા સુદ્યોતતેઽન્તર્હૃદિ જટિલતમો ભિદ્યતે ખિદ્યતેઽન્તઃ
ખદ્યોતદ્યુતિવત્સવિદ્યુત ઇમા નો ભાન્તિ ચન્દ્રાનલાઃ ।
યૂકાશૂકસમો મયૂખસમહામાલી ચ લીલા હિ તે
ઘૂકાસ્તર્કવિતર્કજાલજટિલા વિધ્વંસિતાસ્ત્વદ્દૃશા ॥ ૨૨॥

સીમાભૂમા ત્વમીશો દૃઢતરમહિમા ત્વત્પદાબ્જે કિલૈકો
યસ્ત્વાં ધ્યાયતિ ધ્યાનહીનવપુષા સ ત્વં ત્વમાત્મા પરઃ ।
નો તત્ર ત્રિપુટીકુટીરકુટિલ ચિત્તં નિટાલેક્ષણ
લક્ષ્યાત્મા ત્વપલક્ષ્યલક્ષિતહૃદા ત્વં વેત્સિ તં ત્વામનુ ॥ ૨૩॥

શમિતો મૃગતૃષ્ણિકેવ ભૂમૌ મૃગદૃષ્ટ્યૈવ સ એવ બન્ધહેતુઃ ।
સુભવોદ્ભવપાદસેવિનાં સુગમા વૈ નિગમાગમોરુશીર્ષાઃ ॥ ૨૪॥

પદજાતપ્રકટપ્રભાવબોધૈરહમેવ ત્વમસિ ક્વ ભેદહેતુઃ ॥ ૨૫॥

તન્ત્રયન્ત્રકૃતમન્ત્રવિભક્તૈર્માન્ત્રિકોઽહમિતિ ધીર્ન વિમુક્ત્યૈ ।
ભેદભાનકલનાવિચારતઃ ત્વાં ન જાનત ઇમે પશવઃ સ્યુઃ ॥ ૨૬॥

યુક્તિયુક્તમપિ ભુક્તમખેદં ભક્તમેવ વિગુણં ન તુ ભુક્ત્યૈ ।
મુક્તિમાર્ગફલને શ્રુતિસૂક્તા વક્તિ તત્વમસિ વાક્યતોઽર્થવત્ ॥ ૨૭॥

બહુત્વેઽપ્યેકત્વે ભ્રમભવનતાન્તાઃ કિલ નરાઃ
ન ચૈકં દ્વિત્વં વા શ્રુતિશિરસિ વાક્યાર્થકલને ।
ન બન્ધો મોક્ષો વા ન પરમવરો નાપિ હિ નરઃ
ચકાસ્તિ બ્રહ્મેદં પરમશિવ એકો ધ્રુવસુખઃ ॥ ૨૮॥

વિત્તપિત્તમપનીય ચિત્તતો હૃત્તમો રસદૃશા પરિધૂય ।
કર્તૃતામપિ નિજાત્મવિદ્યયા ભોક્તૃતામપિ સદાત્મદર્શનાત્ ॥ ૨૯॥

દર્શનં ચ હૃદિ તત્ર વિલાપ્ય પ્રાપ્તકામકલનો દલિતાશઃ ।
મૂલકૂલજનિતામથ વિદ્યાં હૃદ્યમેન પરિધૂય અવિદ્યામ્ ॥ ૩૦॥

ઉમાજાને જાને તવ ભવ યદાર્તં જગદિદં ન
જાને તદ્ભિન્નં શિવ ભજનબોધૈર્ગુરુજનૈઃ ।
રમાજાનેર્જાનિં જનિમૃતિનિદાનાદિવિમુખં

મહીજાનેઃ સૌખ્યં લવશતસુરાણાં મમ કિયત્ ॥ ૩૧॥

તર્કૈસ્તર્કિતુમપ્યશક્તકરણૈર્મીમાંસ્યમેતન્ન વૈ
શબ્દૈશ્ચાપિ જડૈશ્ચ તન્ત્રનિવહૈઃ દૃશ્યઃ કિમાત્મા ભવાન્ ।
મનઃક્લૃપ્તાસ્તર્કા ગુણગુણજબુદ્ધિપ્રતિભુવો
વિચારં ચેતો યત્તદપિ શિવ મીમાંસકમતમ્ ॥ ૩૨॥

યતઃ શબ્દો વાગ્ભૂર્મનવચનદરે ત્વમસિ દૃક્
ન વૈ જાતં કિઞ્ચિન્ન ચ ભવતિ સમ્પ્રત્યતિ ભવત્ ।
ન વૈ કાર્યં તસ્ય પ્રભુરણુરપિ સ્થૂલમપિ ન
ન રૂપં ત્વગ્ગન્ધો ન રસરસના વાપિ ભગવન્ ॥ ૩૩॥

ત્વમાત્મા સ્વે ધામ્નિ સ્થિત ઇવ વિભાસીદમખિલં
ન ચોપાધિર્ભૂતાન્યખિલતનવઃ કલ્પિતધિયા ।
મહાવિદ્યામોહાદ્વિવિધતગ્શાસ્ત્રસ્ય વિષયં
અવિદ્યાવત્સર્વં ભવતિ ત્વયિ દૃષ્ટે પરતરે ॥ ૩૪॥

તદેતત્ત્વં ચાપિ ત્વમહમિતિ દૃશ્યં ચ ન હિ
દૃગખણ્ડે પિણ્ડાણ્ડપ્રભવવિહિતે બુદ્ધિકરણે ।
તતો જાતં શાસ્ત્રં તવ શિવદ બોધે કથમિદં
જડં ચેતોવાગ્ભિઃ પ્રતિપદવિમૃશ્યં ભવશતૈઃ ॥ ૩૫॥

કુમર્કૈર્નાનૈવ પ્રભવસિ ચ ભક્ત્યૈવ સુકરઃ ॥ ૩૬॥

શ્રદ્ધાં તે શ્રુતિરાહ સૌમ્યપુરુષેત્યેતત્પરે નિર્ગુણે
સામ્બે રૂપગુણૈકવાગ્વિષયકે નામ્ન્યર્ચને વા ત્વયિ ।
પ્રારબ્ધાન્તિમસમ્ભવેન હિ પથા યોઽયં ચકાસ્તે યથા
યાવચ્ચાપ્યધિકારસાધનપદં તસ્ય ત્વમાત્મા સદા ॥ ૩૭॥

કુટિલજટિલશબ્દતર્કજાલૈઃ શ્રુતિહરિણીં ભષન્તિ વાક્શ્રમાસ્તે ।
ગુણગણવિહિતાઃ શુનાં ગણાસ્તે તવ ભક્ત્યા રહિતાઽપ્યાબુદ્ધબોધાઃ ॥ ૩૮॥

મિથ્યા જગદ્યુગભવાઃ પ્રતિકલ્પમેવં
મૂઢા ગુણપ્રભવતો મુનયોઽપિ ચાન્ધાઃ ।
શાસ્ત્રાણિ તન્વત જગત્પરિવઞ્ચકાસ્તે
પૂર્વાપરોરુવચનૈઃ સ્વધિયૈવ મુગ્ધાઃ ॥ ૩૯॥

તસ્માત્તાન્પરિવઞ્ચસેઽદ્ય ભગવન્નાનાર્થશાસ્ત્રભ્રમૈઃ

મિથ્યાવર્ણનિબન્ધનાશ્રમગણશ્રાન્તાન્વિતર્કે રતાન્ ।
તાંસ્તાંસ્તદ્ભવભાવબોધસહિતાન્સ્વર્ગભ્રમે દુઃખિતાન્
યાતાયાતશતેષુ દુઃખભવને યામ્યે ચ દુઃખોત્કટાન્ ॥ ૪૦॥

સ્વમતિમતકૃતં વિતત્ય શાસ્ત્રં પરિનિન્દત્યનિશં વિહાય વેદાન્ ।
તવ માયામયપાશબદ્ધકીશાઃ ફલજાલેષુ વૃથૈવ વર્ધિતાશાઃ ॥ ૪૧॥

અશનવસનમાત્રસાભિલાષાઃ ભ્રમતોઽન્યોન્યમુપાસકાશ્ચ ભણ્ડાઃ ।
ગુણખણ્ડહૃદા વદન્તિ યુદ્ધે મધુમાધન્મધુપા યથૈવ ભણ્ડાઃ ॥ ૪૨॥

કેચિન્મુણ્ડાઃ કુટીલજટિલાશ્ચક્રતપ્તાસ્તથાન્યે
નગ્ના બૌદ્ધાઃ શ્રમણનિચયાસ્તુઙ્ગલિઙ્ગં વહન્તઃ ।
વિપ્રા વર્ણાશ્રમવરભરા હિંસવા સ્વર્ગકામાઃ
કામારાતૌ વિમુખહૃદયા જ્ઞાનહીના ભ્રમન્તિ ॥ ૪૩॥

કુરઙ્ગા મોહાન્ધા મરુજલધિબુદ્ધ્યાતપતપાઃ
યથા ધાવન્તીશ પ્રશિથિલધિયા તર્ષિતજલાઃ ।
તથેમે મોહાન્ધાઃ હૃદયદહરે ત્વામધિવસં
ભવન્તં હિત્વૈવ પ્રભવમરણૈર્ભ્રાન્તિવશગાઃ ॥ ૪૪॥

અભેદ્યં ભેદ્યેષુ પ્રકટરહૃત્પદ્મસદનં
અવિજ્ઞાતં જ્ઞાતં નિરવધિકસચ્ચિત્સુખવપુઃ ।
ભવન્માયામોહાદ્ભ્રમતિ પરમાનન્દવિમુખં
જગલ્લોકાલોકં સુસસ્વરતિર્યગ્ગતધિયમ્ ॥ ૪૫॥

નાહં ન ત્વં ન ચેમે ભવ ભવભવં વૈ ગતભયં (?)
સદાનન્દં સાન્દ્રં વિરલમપિ ભેદં નહિ મનાક્ ।
અખણ્ડં પિણ્ડાઙ્ગં ન ચ ભવતિ કાર્યં ચ કરણં
ન મોક્ષો નો બન્ધો ભવતિ ભવદાલોકનવશાત્ ॥ ૪૬॥

અનુભવમિદમેવ વેદવેદ્યં યદિ હિત્વાનુભવે ભવોદ્ભવાદ્યમ્ ।
અનુભવશતકોત્થકર્મચિત્રં ન હિ નાશાય ભવોદ્ભવેષુ તસ્ય ॥ ૪૭॥

શાન્તં વેદવચોભિરીડિતપરઃ સ્વાન્તં નિશાન્તે સદા
ચિન્તશાન્તનિતાન્તશાન્તમનસા કોહં કથં વૈ જગત્ ।
નાનાસ્તીતિ વિચાર્ય વેદનિવહૈર્મુક્તઃ સ યુક્તો ભવેત્
તદ્ધ્યાનેઽપિ ચ દુર્લભો યદિ ભવેદ્રૂપં તવ પ્રેમકૃત્ ॥ ૪૮॥

સ્વાન્તં શાન્તમનન્તમવ્યયમુમાકાન્તં સદા ચિન્તયેત્
તેનૈવાશુ વિનાશિતાઘનિચયો ભૂયાત્પ્રમોદાધિકઃ ।
કામારાતિપદામ્બુજાર્ચનરતો ભસ્માક્ષધૃઙ્મુક્તયે ॥ ૪૯॥

યાવત્કાયમયાય દાયકમિદં કામસ્ય યત્સાયકૈઃ
    ભેદ્યં વેદ્યશતૈઃ ચિકિત્સિતવયઃ પાકે ઉપાયૈરપિ ।
તસ્માદેવમુમાસાહયમધુના ધ્યાયે વિનાશ્યં સદા
    હાયં જન્મવિનાશભોગરહિતો યાવદ્દૃઢાઙ્ગઃ સદા ॥ ૫૦॥

ધનગણગણનાવિનાશકાલે વિગુણૈવેહ સદા મદાય દેહે ।
ગણગણવિનર્તં યદા પ્રપદ્યે ત્રિગુણાતીતગુણસ્તદા મુદાઽહમ્ ॥ ૫૧॥

શર્વાણીરમણાર્ચનેન હિ સદા વાતાદ્ભયં (પાતાદ્ભયં) સર્ગતો (સ્વર્ગતઃ , સર્ગતઃ)
    ગર્વેણાપિ અખર્વપાતકવરૈઃ કિં નો ભયં સંસૃતેઃ ।
મય્યાનન્દપયોનિધૌ સુરસરિત્કૂલાઃ પ્રયાન્ત્યેવ તે
    શમ્ભોઃ શમ્ભુવ એવ પાદકમલામોદૈકમાદ્યં મનઃ ॥ ૫૨॥

ઇતિ સન્તતમન્તકાન્તકં વિમૃશન્તઃ સ્વહૃદા પ્રકાશમાનમ્ ।
શમિતેતરસઙ્ગભઙ્ગતઃ સ્વત એવાત્ર ભવન્તિ તે હ્યસઙ્ગાઃ ॥ ૫૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવાખ્યે શુકવિરચિતં શિવમહિમ્નસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૨૦। ૧૫-૫૩॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 20. 15-53..

Notes: Shuka Muni શુકમુનિ; who is Graced with Pārameśvarajñānam પારમેશ્વરજ્ઞાનં by Śiva શિવ Himself, expresses his bhakti and gratitude in form of a Śiva-Mahimna-Stotram શિવમહિમ્નસ્તોત્રમ્.

Proofread by Ruma Dewan

*Shukavirachitam Shivamahimna Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*